This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह E

दाखल क्र M-2508 विषय

नांव कुंड सिध्दांत

लेखक/लिपीकार

पृष्ठ 17

काळ पूर्ण/अपूर्ण अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2508

॥ अथकुंडसिद्धांतप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰ सि॰
१

श्रीगणेशायनमः॥ मत्तमतंगजवदनं सादितविघ्नावलीसदनं॥ गौरीहरयोस्तोकं पालितलोकं हृदा वंदे॥ १॥
कल्याणिवाणिनिजपाणिसरोजयुग्मं संयोज्य देवि करवाणि तव प्रमाणं॥ मत्तुंडमंडलळसद्रसनांगणांतेन्
त्यायनित्यमिदमस्तु रसानुसिक्तं॥ २॥ सतानकल्पतरुमंडपमंडितायां कुंडोल्लसज्ज्वलनकांचनवेदिकायां॥
सीतारघूद्वयकराकलिते कपाणिर्वैवाहहोमसमये दिशताच्छुभानि॥ ३॥ कुंडमंडपसंसिद्धिर्विवृतिं निखि
लोक्तिभिः॥ प्राचीनवाक्यसंदर्भसंदर्शयितुमारभे॥ ४॥ इह खलु शिष्टाः ग्रंथारंभे स्वेष्टदेवतानमस्का
रादिरूपं मंगळमाचरंति॥ तस्मान्माध्यंदिनीयो विठ्ठलशर्मा स्वकृतकुंडसिद्धिव्याचिरव्यासुः स्वा
भीष्टदेवतास्मरणमात्रं रूपं मंगलमाचरति॥ शार्दूलविक्रीडितेन॥ गाढं ध्वांतमनेकभानुजठरे
राजत्कलाधारिणि प्रोद्दंचच्छफरीयुगं दरदलद्भो[?]पुष्प[?]द्धीरावलिः॥ स्वर्णोत्तुंगगिरिद्वयाधरस्चरी दी
ना कालिंदात्मजा पश्याश्चर्यमिदं शिवामिति वदन्स्मेरः शिवः पातु वः॥ ५॥ स्मेरः सहासः शिवः पु
मान्पातु रक्षतु किंभूतः शिवां गौरीमिति वदन् हे गौरि इदं आश्चर्यं कौतुकं पश्यावलोकय॥ ॥
आश्चर्यमेव वर्णयति॥ अनेकभानुजठरे अनेकसूर्योदरे गाढं निबिडं ध्वांतं अंधकारं पश्येत्य
तन्मिषेण गौरीमस्तकस्थरत्नखचितस्वर्णमुकुटांतर्वर्तिनीलालकवर्णनं॥ ॥अन्यच्च॥ ॥राजत्क

राम
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाधारिणि विलसत्पूर्णचंद्रे प्रोदंचच्छफरीयुगं ॥ अतिचंचन्मत्स्यद्वयमेतद्व्याजेन गौरीमुखचंद्रस्थ
चंचलनयनयुगवर्णनं ॥ अन्यच्च ॥ दरदलसज्जेद्रुषद्विकसत्कमले अणुहीरावलिर्लघुवज्रखंडपंक्तिः
एतद्व्याजेन गौर्या ईषद्धास्यवदनांतर्वर्ति दंतपंक्तिवर्णनं ॥ किंच ॥ ॥ स्वर्णोच्चतुंगगिरिद्वयाधश्चरीदी
नाकलिंदात्मजा कनकात्युच्चमेरुपर्वतद्वयाधोगामिनी कृष्णाय सुनेत्येतद्व्याजेन गौरीपृथुतुंगकुच
युगलतटांतरचारी रोमावलीवर्णनं ॥ यथाश्रुतेर्थे विचार्यमाणे संबंधादाश्चर्यमिति ॥१॥ अथव्या
ख्यापूर्वकं ग्रंथनाम उपजातिछंदसा प्रतिजानीते ॥ कृष्णात्रिगोत्रे निरंते पवित्रे पवित्रकर्माजनि बृब
शर्मा ॥ तत्सूनुना विठ्ठलदीक्षितेन विरच्यते मंडपकुंडसिद्धिः ॥२॥ स्पष्टोर्थः ॥ अथ कुंडमंडपादि
विविक्षुस्तावद्धस्तादिपरिभाषां विपरीताख्यानिक्यनुष्टुभ्यामाह ॥ कृतोर्ध्वबाहोः समभूतगत
स्य कर्तुः शरांशः प्रपदोच्छ्रितस्य ॥ योवा हस्तोस्य जिनांशकोपि स्यादंगुलं तत्त्वादिभांशकार्ये ॥३॥
यवो यूका चली क्षा च वालाग्रमेवमादयः ॥ कृतमुष्टिः करो रत्निररत्निरकनिष्ठिकः ॥४॥ कृतावूर्ध्वौ
बाहू येन तथा समभूविसमपादतयास्थितस्य वामपदं पादाग्रं तेन भुवमालंब्योच्छ्रितस्य कर्तुर्यजमा
नौ पंचमांशः सहस्तः यो जिनांशकश्चतुर्विंशोंशः तदंगुलं तत्त्वादिभांशकास्तस्य तस्य अंगुलादे

स

स्य

अस्य २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰सि॰
२

अ॰२

र्यद्दुकं भवति॥ अंगुलस्याष्टमांशो
र्यद्दुभांशा अष्टमांशास्तेयवः यूकालीक्षावालाग्रं एवमाद्यो भवंति॥ एतदुक्तं भवति॥ अंगुलस्याष्टमांशो
यवः तस्याष्टमांशो यूकातस्याष्टमांशो लीक्षातस्याष्टमांशो वालाग्रं तदष्टमांशो रथरेणुस्तदष्टांशास्त्रस
रेणुः तदष्टांशाः परमाणुरिति॥ कृतमुष्टियजमानहस्तः रत्निस एकविंशत्यंगुलात्मकः सरत्निः॥ अकनिष्ठि
कः मुक्तकनिष्ठः अरत्निः ससार्द्धद्वाविंशत्यंगुलात्मको हस्त एव॥ अरत्निहस्तयोः प्रायः अभेद एवेति॥
आख्या॥ कात्यायनः॥ यजमानेनऽऊर्ध्वबाहुनाप्रपदोच्छ्रितेन समास्थितेनवेति॥ तथापंचारत्निः पुरु
षादशापदोद्वादशांगुलमिति॥ तथाविंशतिशतांगुलः पुरुषइति॥ अत्रसमस्थितेनप्रपदोच्छ्रितेनवे
त्ययंकात्यायनोक्तः श्रौतो विकल्पः यतः विकल्पस्य साक्षाच्छ्रुतिमूलकत्वं॥ तुल्यार्थास्तु विकल्पेरन्नि
ति जैमिनिः॥ अथपंचरात्रादिषु॥ श्रुतिद्वैधं तु यत्रस्यात्तत्रधर्मावुभौस्मृतौ वितिसमस्थितेनप्रपदो
च्छ्रितेनेत्येच्छिको विकल्पः॥ आचार्यहस्तस्याकनिष्ठिकाद्येश्चतुर्भिरेवांगुलिभिर्महर्षे॥ मध्यांगुलेर्म
ध्यमपर्वभागे तिर्यग्विसर्पद्भिरियंतु मेयात्॥१॥ अत्र आचार्यमानमुपदिष्टं तत्रापि आचिनो
ति॥ अर्थान्कर्मफलरूपान् इति यास्कवाल्यबलात् व्युत्पतिबलाद्दानवाचनान्वारंभणवरुणव्रत
प्रमाणेषु यजमानं प्रतीयादिति कात्यायनोक्तेश्चाचार्यो यजमानएव॥ अथसमार्तकमणिकथ्यं

राम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौतवाक्यावसर इतिनाशक्यंयथाश्रौतेप्यग्निहोत्रादौसदोपवीतिना भाव्यंसदाबद्धशिखेनेत्याद्यविरुद्धं
स्मार्तमंगीक्रियते तद्वत्स्मार्त्तेप्यस्मिन्कर्मणी श्रौतंग्राह्यमेवेति॥ आदित्यपुराणे॥ जालांतरगतेभानौयत्सूक्ष्मं
दृश्यतेरजः॥ प्रथमंतत्प्रमाणानांत्रसरेणुःप्रचक्षते॥ त्रसरेणुःसविज्ञेयोयेष्टौस्युःपरिमाणवः॥ त्रसरेणव
स्तुतेह्यष्टौरथरेणुस्तुसस्मृत॥ रथरेणवस्तुतेह्यष्टौवालाग्रंतत्स्मृतंबुधैः॥ वालाग्राण्यष्टलीक्षातुयूकालीक्षा
ष्टकंस्मृतं॥ अष्टौयूकायवंप्राहुरंगुलंतुयवाष्टकं॥ तत्रैव॥ रत्निस्त्वंगुलपर्वाणिविज्ञेयस्त्वेकविंशतिः॥ अरत्निःकनिष्ठः
सषोडशांशावियुक्करः॥ अरत्निरेवहस्तःस्मृतावभिहितः अरत्निंप्रकल्प्य चतुर्विंशत्यंगुलीभिर्मिमीत इति॥ अन्य
दंगुलादिमानंयत्तत्कार्येषुद्रष्टव्यं॥ ॥अथकुंडमंडपयोगीप्राचीसाधनं॥ विवस्वत्तावदुपयोगिनीमितिकर्त
व्यतांस्रग्धरयाह॥ ज्ञात्वापूर्वंधरित्रींदहनखननसंप्लावनैःसंविशोध्यपश्चात्कृत्वासमानांमुकुरजठरवच्चाच
यित्वाद्विजेंद्रैः॥ पुण्याहंकूर्मशेषौक्षितिमपिकुसुमाद्यैःसमाराध्यशुद्धे वारेतिथ्यांचकुर्यात्किरपतिककुभः
साधनंमंडपार्थे॥ ५॥ पूर्वंप्रथमतोधरित्रीं ज्ञात्वाइयंभूमिकुंडादिकर्तुंयोग्याअयोग्यातिविचार्यततोदहन
खननसंप्लावनादिभिः स्मृत्युक्तैःशोधनोपायैश्चसंशोध्यततोगुणिजनैनबुध्यावामुकुरजठरवदादर्शोदरवत्स
मांकृत्वाद्विजेंद्रैःब्राह्मणैःकृत्वापुण्याहंवाचयित्वा कूर्मशेषौक्षितिमपिशब्दाद्राहुंपुष्पादिभिःसमाराध्यप्रज

२५

शं. टी.

२

अथशंकुसमत्वसाधनं स्थूलआर्य्या। साधनं च उपजातिविपरीताख्यानकीभ्यामाह॥ नृपांगुलैः षोडशांगुलैः परिमि
तेनकर्कटेनसूत्रेणवा वृत्तं विलिख्य तन्मध्ये द्वादशांगुलं शंकुं दृढं सूक्ष्माग्रं स्थापयेत्॥ कीदृशं॥ विंशत्यंगुलपरिमि
ताभिर्ऋजुतमोभिश्चतस्रभिः समानाभिः समाभिः कल्पितदिगंतवृत्तकृतरेखास्थाभिः संस्पृष्टमस्तकं एवं
शंकुसमत्वं साधयित्वा तादृशस्य शंकोः छायापूर्वाह्णे यत्र यस्मिन्प्रदेशे प्रविशति यत्र हस्ताद्बहिरपराह्णे ऽपैया
नृपांगुलैः संमितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य॥ रव्यंगुलं शंकुममुष्य मध्ये निवेशयेत्खाक्षि २०
मितांगुलीभिः॥६॥ चतसृभिश्चैवसृजुत्तमाभिः संस्पृष्टशीर्षं तु समे षिकाभिः॥ तच्छंकुभायत्र
ल विशेदपेयाद्बहिश्च मांस्तावरुणैंद्रकाष्ठे॥७॥ कर्ककीटगोमृगे यूकया साद्राभ्यां वाल्या सिंहकुंभति
केपि॥ यां वैकांच्यां भानुमान्याति तस्यां वाल्याद्वैहके कर्मुकेवालनेनं॥८॥ ॥
॥७॥
तत्र विंदूयोः क्रमात्प्राचीप्रतीच्यौ भवत इतिव्याख्या॥ तत्र सार्धश्लोकस्योपपत्तिः॥ तत्र दोः कोट्योर्नभभेदान
स्वरूपभेद इति॥ दोः कोटियोगपदं वर्ग इति॥ शंकुरेखा वृत्तरेखायावच्छीयमानं कोटिः। शंकुर्भुजः १२ एतत्स्कृत्या
योगपदं कर्णः २० वृत्तपरिधिस्पृष्टाद्दिगंताच्छंकुर्यावच्छीयमानाश्चतस्रः शलकाः कर्णा भवंति॥७॥ एवं स्थूल
प्राचीसाधनं उक्त्वा सूक्ष्मप्राचीसाधनं शालिन्याह॥ साप्राची कर्कसंक्रांतौ वृश्चिकसंक्रांतौ मकरसंक्रांतौ च एक
यायूकया वाल्या सूर्यस्यायनवशादुत्तरायणेउत्तरतोदक्षिणायने दक्षिणतः एवं सिंहवृश्चिके सिंहकन्यातुलासंक्रांतौ

दृष२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंप्राचीसाधनमुक्त्वोत्तरदक्षिणयोंसाधनंशालिन्याह॥कुंडमंडपादेर्यावद्विस्तारः तद्विगुणांकृतमध्यांकांउ
भयांतयोःपाशवतीरज्जुंइष्टव्यासातेप्राचीप्रतीच्योर्दत्तशंकोर्विन्यसेत्॥ततोमध्यांकेधृत्वारज्जुंदक्षिणेउत्तरेचा
कर्षेद्विद्वान्कर्षांकेदक्षिणोत्तरास्स्यादितिव्याख्या॥९॥अत्रस्पष्टैवयुक्तिरिति॥२॥अथरात्रौदिक्साधनोपा

रज्जुंद्विघ्नामध्यचिह्नांसपाशांप्राचीशंकौपश्चिमेचापिदत्वा॥कर्षेद्धीमान्दक्षिणेचोत्तरेच
तच्चिह्नेस्याद्दक्षिणाचोत्तरादिक्॥२॥निशिवाश्रवणोदयादिगेंद्रीगुरुभस्योदयनेंथवाक्किम
स्य॥सुरवर्धकिवायुभांतरालेप्यमुतःसाधयपूर्ववच्चयाम्यां॥१०॥ ॥श्रीगोपाळ॥श्री॥

यंवसंतमालिकयाह॥अथरात्रौश्रवणोदयेप्राचीअथवापुष्यस्योदयेअथवाकृत्तिकोदयेप्राचीअ
थवासुराणांवर्धकिस्त्वष्टावायुस्तयोर्भेचित्रास्वात्योस्तयोरंतरालेप्राचीअमुतःप्राचीतःपूर्ववद्यथोक्ते
नयथायाम्यांदक्षिणदिशांसाधयेदितिव्याख्या॥शुल्बं॥कृत्तिकाःश्रवणःपुष्यंचित्रास्वात्योर्यदंतरं॥एत
त्प्राचीदिशांरूपंयुगमात्रोदितेसुरइति॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु·सि·टि·
४

अथचित्रास्वात्योर्मध्येप्राचीत्वकंतन्मध्यस्यदुर्ज्ञेयत्वात्तदुपायमनुष्टुभाह॥ चित्रांविध्वैकयास्वातीमन्ययापिशला
कया॥ एकयारज्वाशलाकयाचित्रांविध्वान्ययाचाद्दष्टेवशलाकयास्वातींविध्वानयोःशलाकयोरुपरिदक्षिणोत्तरां
मध्यांकांत्ततीयांशलाकांसमतयादद्यात्॥ प्रथमद्वितीययोःशलाकयोःमूलेएकीकृत्यत्ततीयामध्यांकाद्रुभयसं
पातंयावच्चतुर्थीशिलाकांप्रांतरेरज्जुप्रोतलंबकद्वयवर्तीपूर्वापरायत्तांदद्यात्॥ यत्रलंबिकौभूम्यांपतितौतत्रान्ययोः
पूर्वापरसूत्रदानात्स्पष्टाप्राचीस्यत्रस्पष्टायुक्तिव्याख्यानेति॥११॥ अथप्रकारांतरैःलघूपायेनोदीच्वीसाधनमाह

चित्रांविध्वैकयास्वातीमन्ययापिशलाकया॥ तिर्यक्कांतरचिंह्नात्तुद्विमूलेन्यास्फुटंद्रदिक्॥११॥ दिनमा
नदलेसप्तांगुलछायायतोहियत्॥ शंकुमूलेनीयमानंसूत्रंस्यादुत्तरादिशा॥१२॥ दिगंतशंकुद्वयगंढि
पाशांविस्तारेल्यंगुणकंदलांके॥ कोणेप्रकर्षेदितिवेदकोणेष्वेवंचतुःकोणमतीवसाधु॥१३॥ राम॥

कु

तु

तिथिमात्राद्गणिताद्वादिनमानमेतावदितिज्ञात्वाघटिकादिनाज्ञातेदिनार्धेमध्याह्नेसप्तांगुलशंकोर्यत्रछायायं
लगति॥ तस्माछंकुमूलंयावन्नीयमानंसूत्रंदक्षिणोत्तरमिति॥ अथवासप्तांगुलशंकोगणितागतमध्याह्निकछा
छायातुल्यातस्यैवछायायदास्यात्तदयाछंकुमूलंनीयामानंसूत्रंदक्षिणोत्तरेति॥ अत्रयुक्तिस्तस्मिन्समयेरवि
दक्षिणोत्तरवृत्तेभवतीतिततः पूर्ववत्सूत्रंपरेसाध्ये॥१२॥ एवंदिक्साधनंविधायमंडपस्यचतुःकोणत्वाच्चतुःकोण
साधनंविपरीताख्यानस्याह॥ दिगंतयोःपूर्वदक्षिणयोःदक्षिणापरयोःउत्तरपूर्वयोःशंकुद्वयगंढोपाशौयस्यतत्वि
स्तारेणतुल्यगुणंसूत्रंअर्धचिंह्नेकोणेआकर्षयेदेवं॥ चतुर्ष्वपिकोणेष्विइतिकृतेसाधुचतुरस्त्रंस्यादिति॥ रामकृष्ण

ग ५

श्रीराम
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं:२

अथमंडपेविशेषंशालिंन्याह॥मंडपस्यभूमिंहस्तोछायामर्धहस्तोछायांवाकुर्याच्चोद्वितीयोमंडपःकार्योभव
ति॥तदामंडपप्रमाणपरिमितांभूमिंमध्येत्यक्त्वाद्वितीयंमंडपंकुर्यादितिव्याख्या॥१४॥अथमंडपप्रमाणंवसंत
तिलकयाह॥दशहस्तोद्वादशहस्तोधमःस्यात्। द्वादशाचतुर्दशहस्तोमध्यः षोडशाष्टदशहस्तउत्तमः तुला
पुरुषदानेविंशतिहस्तोप्युत्तमः॥मंडपेआयामविस्तारोतुल्यावे तिव्याख्या॥अत्रविस्तारायामयोरंगुला
दिकंक्षिप्त्वावाक्षायासिध्यर्थंयतितव्यं॥१५॥अथद्वारमानंवेदीमानंचाख्यानकयाह॥दिङ्मध्येद्वारचतुष्टयं

उच्चांभूमिंमंडपस्यप्रकुर्याद्धस्तोन्मानामर्द्धहस्तोन्मितांवा॥मध्येभूमिंमंडपेनोन्मितांचयत्नात्कुर्यान्मं
२ डपंचैद्वितीयः॥१४॥दशसूर्यकरोन्मितोधमःस्याद्दि१२शक्र१४प्रमितैःकरैस्तुमध्यः॥धृति-१८भू
प१६करोन्मितोवरीयान्नख२०हस्तोप्यथमंडपस्तुलायां॥१५॥दिगंतरालेद्विकरंभवेद्वाचतुष्ट
यंवेदमजांगुलैस्तत्॥विवर्द्धितंमध्यवरिष्ठयोःस्याद्वेदीत्रिभागेनसमाकरोच्चा॥१६॥तुलाप्रद
नेधममध्ययोःसास्यात्पंचहस्तोत्तमकेद्विहस्ता॥ईशानभागेग्रहवेदिकापिहस्तोन्मितोच्चावयतीत्रिवप्रा॥१७

द्विहस्तंभवति॥तद्वारचतुष्टयंमध्यमोत्तमयोर्मंडपयोःचतुरष्टांगुलवृद्धिमत्मध्येमंडपेचतुरंगुलवृद्धिःउत्तमेचा
स्य ष्टांगुलवृद्धिःकार्या॥वेदीमंडपस्यतृतीयांशेनमध्येकार्यामंडपेनवकोष्ठकेकृतेसतिमध्येकोष्ठेकार्या॥समाहस्त
मात्रमुच्चाकार्या।अन्यत्रइष्टिकाभिःकार्येतिएतत्केवलंसमत्वसाधनायेतिव्याख्या॥अथतुलापुरुषदानेविशेष
माह॥तुलापुरुषदानेअधममध्यममंडपयोःपंचहस्ताउत्तममंडपेसप्तहस्ताभवतीतिव्याख्या।मंडपस्यैशानभागेग्रहवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰सिं॰टि॰ ५

समेत्ततीयेभ्रोपूर्वापरं दक्षिणोत्तरं चापि सूत्रं दद्यात्॥ एवं नव
अथ स्तंभनिवेशनं भुजंगप्रयातशालिनीभ्यामाह॥ कोष्ठात्मको मंडपो भवति ततस्तृतीयांशांतेष्वष्टसु चतुर्षु बहिः कोणेषु स्तंभान् दृढान् यज्ञवृक्षोद्भवान् पंचहस्तप्रमा
णान् द्वादशस्तंभान् दद्याद्धारयेत्॥ वेद्याः कोणेषु अष्टहस्तप्रमाणान् चतुरस्तंभान् सचूडान् तादृशानेवाधि
दिक्कः प्रादक्षिण्यात् दद्यात् रोपयेत्॥ स्तंभपंचमांशं भूमौ निखनेदेवं कृते षोडशस्तंभस्थापनं स्यादिति व्याख्या॥ १८॥

समत्रित्रिभागे च सूत्रं प्रदद्यादुदग्दक्षिणं चापि पूर्वापरं च॥ ततस्तंत्रशा पूर्वे च कोणेषु दद्यात्समस्तं
भकान्द्वादशो वेषु हस्तान्॥ १८॥ वेद्याः कोणेष्वष्टहस्तांश्च वेदस्तंभान्दद्यात् ह्यक्किदिक्कः सचूडान्॥ प्रा
दक्षिण्यात्संचमांशं तु भूमौ दद्यादेवं षोडशस्तंभसंस्था॥ १९॥ स्तंभेषु तिर्यग्वालिकानि धेयाश्चू
डासु कर्णेष्वथवा बहिःस्थाः॥ पूर्वापरं दक्षिसौम्यसंस्थं कोणं तराकाष्ठचयं निदध्यात्॥ २०॥ ॥

भो ५

अथ स्तंभपरिकाष्ठनिवेशनं इंद्रवज्रयाह॥ प्रथमं चतुर्षु स्तंभेषु वेदिकोणेषु वलिकाख्यं काष्ठं चतुष्टयं प्रतिष्ठितव
न्निधेयं॥ तत्र पूर्वापरद्वयं दक्षिणोत्तरद्वयं च चूडासु निदध्यात्॥ तिर्यक्कुनिहितस्य काष्ठस्य वलिकेति सं
ज्ञा॥ एवं द्वादशस्वपि बाह्येषु स्तंभेषु कर्णेषु वा चूलिकासु वलिकाकाष्ठानि निधेयानि॥ ततो मध्यस्तंभचूडा
तः पूर्वापरमेकं दक्षिणोत्तरमेकं कोणं चैकं काष्ठं समतया स्थापयेत्॥ एवं चतुर्ष्वपि स्तंभेषु द्वादशकाष्ठानि भ
वंति॥ ततो मध्ये च काष्ठानि सकर्णानि देयानीति व्याख्या॥ २०॥ ॥ श्रीरामजयरामजयजयराम॥

श्रीराम ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथमंडपस्याछादनं रथोद्धतयाह ।। वेदिस्तंभोपरिशिखराकारांस्वनां कृत्वा एनंमंडपं द्वारवर्जितं कटैर्ऋजुवंशै
श्छादयेत् ।। षोडशापिस्तंभान् रक्तवस्त्रसमूहैः दुकूलादिभिः श्छादयेति व्याख्या ।। ।।क्रियासारे ।। ।।नारीकेलि
दलैश्चापि पल्लवैर्वार्थिवेणुभिः ।। आछाद्या मंडपाः सर्वे द्वारवर्जंतु सर्वतः ।। वास्तुशास्त्रे ।। कटैः सद्भिस्तु संछाद्या विज
याद्यास्तु मंडपा इति ।। हयग्रीवपंचरात्रे ।। दर्पणैश्चामरैर्घंटैस्तंभान्वस्त्रैर्विभूषयेदिति ।। २१ ।। अथतोरणानि वंसं
ततिलकमाह ।। पूर्वादिदिक्षु वटोदुंबराश्वत्थप्लक्षैस्तोरणानि रचयेत् ।। अथवाश्वत्थोदुंबरप्लक्षवटैः रचयेत् ।।

मध्यभागशिखरं रचयित्वा छादयेदपि कटैर्ऋजुवंशैः ।। द्वारवर्जमिह मंडपमेनं स्तंभकानपि तु
वस्त्रसमूहैः ।। २१ ।। पूर्वादिदिक्षु रचयेदपि तोरणानि न्यग्रोधजंबुफरुपर्कटिवृक्षराजैः ।। अश्व
त्थजंतुफलकैर्पाटिभूरिपद्धिवैषामभावतद्रुमान्यथवैककेन ।। २२ ।। हस्ताद्वहिर्मंडपतः शरांगैर्द
स्वरैः करैस्तान्यधमादिकेषु ।। दीर्घाणि चप्राकुरथायतिःस्यात्तेषांद्विहस्ता चरणप्रवध्या ।। २३ ।।

एषां वृक्षाणामभावे इमानितोरणानि एकेनैव वृक्षेण यथोपपन्नेन रचयेदिति व्याख्या ।। २२ ।। अथतो [redacted]
रणमानं निवेशं च विपरीतारव्यानक्याह ।। मंडपाद्वहिर्हस्तमात्रे तानितोरणानि पंचषट्सप्तहस्तैः दीर्घाणि अधमादिके
षु अधममध्यमोत्तमेषु मंडपेषु प्रवदंति ।। अथैतेषांतोरणानामायतिरायामो द्विहस्तः रणवध्यासहस्यात् ।। चरणशब्देनां गु

रूपवृक्षः ।। अधमाद्विहस्ततमायतिमिति मध्यमषडंगुला
निर्दिष्टोत्तमेसार्धहस्ततयामितिव्याख्या २३

धे

वृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगुले२१ यव२ हस्त३१ अंगुले१२।

कुं॰ टी॰ ६

श्रथफलकादिनि वेश्रानंउपजातीद्ववज्राभ्यामाह॥ स्तंभानांतोरणस्तंभानां यन्मानं तस्याधमानेन रूपरिणाहार्णो

मर्धेतिर्यक्कूफलकमुपांतयोः सछिद्रंस्यात्॥ फलकंनाम तोरणस्तंभोपरितिर्यक्कूदीयमानकाष्ठपट्टिकेत्यभिधीय

ते॥ अल्पमंडपतोरणे सार्धहस्तद्वयमितं मध्येहस्तत्रयपरिमितंउत्तमेचसार्धत्रयहस्तपरिमितंत्रो वेयागे चतु:

२ अंगुले१२ फलकमस्तकेत्रूलाकृतयः नवेकादश त्रयोदशांगुलदीर्घाः स्वचतुर्थांशेन विस्तृताः॥ तेन सपादो द्व्यपादोन अंगुले२ यव२

ष ले२ यव६ त्र्यंशसपादत्र्यांगुलविस्तृताः॥ स्वतोरणकाष्ठजाः कीलाश्चत्वारो भवंति॥ तेषां कीलानां फलकस्य मध्यभागेवेश

स्तंभार्घमानंफलकंतु तिर्यक्कूनवेशांविश्वप्रमितांगुलाश्च॥ तन्मूर्ध्निकीलास्वतुरीयभागस्ततास्तु

शूलाकृतयश्चतेस्युः॥ तद्देशानांद्वित्रियुगांगुलानिशेवेतु विस्तार्यजिनेगुलधि:॥ कीलेषुशंख

रिगदांबुजांकेषिवंशयः किलतोरणेषु॥ २४॥

मेषुमंडपेषुस्यात्॥ विह्नयागेपुनरंगुलद्विरिति अधमादिषुमंडपेषु॥ श्रीराम ६

नंद्वित्रिचतुरंगुलमितं अल्पमध्यमोत्तमेषु मंडपेषुस्यात्॥ विह्नयागेपुनरंगुलद्विरिति अधमादिषु मंडपेषु॥

नंद्वित्रिचतुरंगुलमितं अल्पमध्यमोत्तमेषु मंडपेषु ... साधत्रयांगुलायामावेशानार्थं

दशद्वादशांगुलचतुर्दशांगुलादीर्घाः॥ स्वचतुर्थांशेन विस्तृताः तेनसार्धद्वयसार्धत्रयांगुलायामावेशानार्थं

दशद्वादशांगुलचतुर्दशांगुलादीर्घाः॥ स्वचतुर्थांशेन विस्तृताः॥ ... फलकम

मधोलघुकीलेनसहिताः प्रागादिक्रमेण शंखचक्रगदापद्मचिह्निताः कीलाः स्वतोरणकाष्ठभवाः फलकम

ध्येनिधेयाः॥ तोरणस्तंभेष्वपिपंचमांशेनखननमितिव्याख्या॥ २४॥ श्रीराम॥ ॥ ॥

त्रय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ ९ २

अथ मंडपवर्णनव्याजेन मंडपालंकरणानि वदन्मंडपकर्तृभ्यः आशिषं शार्द्दूलविक्रीडितेनाह ॥ उद्यंतिउर्ध्वीभ
वंति पत्राणि यासां तास्तथा फलैः अतिनम्रा विलसंत्यः कोमला एतादृश्यो या रंभाः कदल्यस्ताभिरालिंगितास्तंभा
यस्य स स्तंभमूले धृत तादृशा धृतकदलीकः वैरैराम्रपल्लवैः सर्वत्र कृतवेष्टनः राजंति चामराणि यस्मिन्तादृशाः
सन्सुप्रबद्धाः मुकुराः आदर्शा यस्मिन्नादृशाः सन् उदंचति उपरि विलसंति एतादृशानि वितानानि तैरंवितोन्वितः पु

उद्यत्पत्रफलातिनम्रविलसद्रंभाभिरालिंगितस्तंभोनेकदलैर्रसालविटपैः सर्वत्रसंवेष्टितः
राजच्चामरसंप्रबद्धमुकुरोदंचद्वितानांचितोयुक्तः पुष्पफलैः फलायभवतांभूयान्महामंडपः २५
ध्वजान्दिहस्तायतिकांश्च पंचहस्तान्सुपीतारुणकृष्णनीलान् ॥ श्वेतासितश्वेतसितान्दिगी
शवाहान्वहेदिक्करवंशसंस्थान् ॥ २६ ॥

ष्पाणि पनसचंपकजातीमालतीमल्लिकाकुंकरादीनि फलानि जंबीरदाडिमकदलीनारीकेलपूगफलादीनि तैरन्वि
तस्तादृशोयं महामंडपः भवतां फलायोत्तमफलप्राप्तये भूयादिति व्याख्या ॥ २५ ॥ अथ ध्वजनिवेशनं विपरीताख्या
नक्याह ॥ ध्वजान्दिहस्तमितायामान् पंचहस्तदीर्घान् पीतारुणकृष्णनीलश्वेतकृष्णश्वेतश्वेतानौरिका दि
लिखितदिक्पालवाहान् दशहस्तवंशमस्तकेयोजितान् हस्तद्वयनिखातान् ध्वजांस्तानपि पूर्वेत इति वक्ष्यमाण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं·टी·
७

अथपताकानिवेशनंमहाध्वजनिवेशनंनवकुंडपताकानिवेशनंचेंद्रवज्रानुष्टुभ्यामाह॥ लोकेशवर्णास्त्रयुताःपताका
शैलेंदुदैर्घ्याजतिकाश्चमध्ये॥ चित्रंध्वजंदिक्करदैर्घ्यवंशंत्रिहस्ततंप्रांतगकिंकिणीकं॥ लोकेशानांलोकपालानां
येवर्णाःपीतादयःपूर्वश्लोकोक्ताःगैरिकादिलिखितवज्रशक्तिदंडखड्गपाशांकुशगदात्रिशूलानितैर्युक्ताःसप्त
हस्तदीर्घाएकहस्तविस्तृताःपताकाःदशहस्तवंशशीर्षगाःचित्रध्वजंत्रिहस्तविस्तृतंप्रांतेवर्तमानकिंकिणीकंरवी
षिसदाचासरंदशहस्तदैर्घ्यवंशंश्वेताहशंतंमध्येविन्यसेत्॥ पूर्वादितःपताकाश्चविन्यसेदित्युत्तरश्लोकेनान्वयः

लोकेशवर्णास्त्रयुताःपताकाशैलेंदुदैर्घ्यायतिकाश्चमध्ये॥ चित्रंध्वजंदिक्करदैर्घ्यवंशंत्रिहस्ततंप्रां
तगकिंकिणीकं॥२७॥ श्वेतांचनवमींपूर्वेशानयोर्मध्यतोबुधः॥ विन्यसेच्चपताकाश्चध्वजास्ताअ
पिपूर्वतः॥२८॥ प्राच्याश्चतुःकोणभागेंदुखंडत्रिकोणवृत्तागभुजांबुजानि॥ अष्टास्रिशक्रेस्वरयो
स्तुमध्येवेदास्रिवारत्तमुशांतिकुंडं॥२९॥ राम॥ ॥

नवमींपताकांपूर्वेशानयोर्मध्येश्वेतांताहशमेवाचार्यकुंडेविन्यसेत्॥ ध्वजान्ताअपिपताकाःपूर्वादिक्रमेणभूमौ
ने२ पंचांशारोपणेविन्यसेदितिव्याख्या॥२८॥ अथकुंडनिवेशनंविपरीताख्यानक्याह॥ प्राचीमारभ्यचतुरस्रयोनिवृ
त्तअर्धत्रिकोणवृत्तषडस्रिपद्मअष्टास्रिकुंडानिभवंति॥ प्राचीशानयोर्मध्येनवममाचार्यकुंडंस्यात्॥ तच्चतुरस्रंवृत्तं
×

राम
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथपंचकुंड्येकपक्षानिवेशनमिंद्रुवज्रयाह॥ आशादिकुतत्रकुंडानिचतुरस्रवृत्तार्धवृत्तपद्मानिईशानदिशि
२ कुंडंचतुरस्रंवृत्तंवातेःपंचकुंडीनिवेशनंस्यात्॥ यदाचैकमेवकुंडंतदापश्चिमेउत्तरेवाईशान्यांवास्यात्॥ अतः
परं तुरस्रवेद्याःसकाशात्तानिसर्वाणिकुंडानिसमपादेनकरेणत्रिंशदंगुलांतरेणवा पादांतरेणद्वादशांगुलां वेदी२
तरेणभवंतीतिव्याख्या॥ २९॥ यत्रोपदिश्यतेकुंडंचतुष्कंतत्रमर्कोणि॥ वेदास्रमर्धचंद्रंचवृत्तपद्मनिभंतथा॥ कुर्या
आग्नेयकुंडं रिद्रपंचकुंडीचैकंयदापश्चिमनैवसोमे॥ वेद्याःसपादेनकरेणयद्वापादांतरेण
खिलकुंडसंस्था॥ ३०॥

कुंडानिचत्वारिप्राच्यादिषुविचक्षणः॥ पंचमंकारयेत्कुंडमीशादिग्गोचरंद्विजः॥ अयंमध्यमःपक्षः॥ कैश्चित्सू
३ वैयोर्मध्येइतिलिखिततदसत्॥ सोमशंभो॥ एवंवाशिवकाष्ठायांप्रतीच्यांकारयेद्बुधः॥ आचार्योऽपि॥ अ
थवादिशिकुंडमुत्तरस्यांप्रविदध्याच्चतुरस्रमेकमेवेमांति॥ अयंकनिष्ठःपक्षः॥ नवग्रहाधिकारिण्योनिर्वसिष्ठ
संहितायां॥ कुंडंतन्मध्यभागेतुकारयेच्चतुरस्रकं॥ विनाशितद्वयरवातंतकुंडंकुर्यात्समेखलमिति॥ वेदिपादांतरंत्य
क्त्वाकुंडानिनवपंचच॥ नारदीये॥ कुंडंवेद्यंतरंचैवसपादकरसंमितमिति॥ कैश्चित्त्रयोदशांगुलमप्यंतरमुक्तमिति

॥ कुंडसिद्धिटीकाविवृत्तिका॥

कुं॰टी
८

अथवर्णविशेषेस्त्रीणांचकुंडविशेषंशालिन्याह॥ आसनादारभ्यब्राह्मणक्षत्रियवैश्यशूद्राणांक्रमेणचतुःकोणव
र्तुलार्धत्रिकोणानिभवंति॥ अथवासर्वेषांचतुःकोणानि॥ अथवावर्तुलानिसर्वेषांभवंतिस्त्रीयजनकेयो
न्याकाराण्येवभवंतीतिव्याख्या॥ ३१॥ शारदातिलके॥ विप्राणांचतुरस्रंस्याद्राज्ञांवर्तुलमिष्यते॥ वैश्याना
मर्धचंद्राभंशूद्राणांत्र्यस्रमीरितं॥ चतुरस्रंचसर्वेषांकेचिदिच्छंतितांत्रिकाः॥ पंचरात्रे॥ सर्वाणितानिवृ

विप्रानुल्यस्रंचवृत्तंचवृत्तार्द्धंत्र्यस्रंस्याद्दृक्कोणानिवापि॥ सर्वाण्याकुर्वृत्तरूपाणिचान्ये
योन्याकाराण्यंगनानांतुतानि॥ ३१॥ सिद्धिः पुत्राः शुभंशत्रुनाशःशांतिमृतिछिदे॥ रुक्षिरा
रोग्यमुक्तंहिफलंप्राच्यादिकुंडके॥ ३२॥

नानिचतुरस्राणिवासदेति॥ सनत्कुमारः॥ स्त्रीणांकुंडानिविप्रेंद्रयोन्याकाराणिकारयेत्॥ अथप्राच्या
दिकुंडेषुफलविशेषमाह॥ प्राच्यादिकुंडेष्वष्टसुअष्टफलानिस्युरिति॥ शारदायां॥ सर्वसिद्धिकरंकुंडंचतुर
स्रमुदाहृतं॥ पुत्रप्रदंयोनिकुंडमर्द्धचंद्रंशुभप्रदं॥ शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांतिकर्मणि॥ छेदमारण
योः षष्ठंषडस्रंपद्मसन्निभं॥ वृष्टिदंरोगशमनंकुंडमष्टास्रमीरितं॥ ऐंद्र्यांस्तंभेचतुःकोणमग्नौभोगेभगाकृ
ति॥ चंद्राधमारणेयाम्येद्वेषेत्र्यस्रंतुनैर्ऋते॥ वारुण्यांशांतिकंवृत्तंषडस्रमुच्चाटनेनिले॥ उदीच्यांपौष्टिकंपद्मं

राम
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ होमसंख्यया कुंडमानं शिखरिण्याह ॥ शतार्द्धमिते पंचाशन्मिते होमे रत्निमितं कुंडं ॥ शतमिते ऽरत्निमि
तं ॥ सहस्रहोमे हस्तमितं ॥ दशसहस्रमिते द्विहस्तं ॥ लक्षहोमे चतुर्हस्तं ॥ कोटिहोमे अष्टहस्तमितं वा दश
हस्तमितं वा ॥ केचित्षोडशाकरमपि प्राहुरिति व्याख्या ॥ ३३ ॥ भविष्यपुराणे ॥ मुष्टिमानं शतार्धे तु शते वा रत्नि
मात्रकं ॥ सहस्रे त्वथ होतव्ये कुंडं कार्यं करात्मकं ॥ द्विहस्तमयुते तद्वल्लक्षहोमे चतुःकरं ॥ x ती x दशलक्षमि
ते होमे षट्करमप्रचक्षते ॥ अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकं ॥ शानदायां ॥ दशहस्तमितं कुंड

शतार्द्धे रत्निः स्यात्त्शतपरिमिते रत्निविततं सहस्रे हस्तं स्यादयुतहवने हस्तयुगलं ॥
चतुर्हस्तं लक्षे प्रयुतहवने षट्करमिभैः ककुब्भिर्वा कोटौ नृपकरमपि प्राहुरपरे ॥ ३३ ॥
लक्षैकवृध्या दशलक्षकांतं करैकवृध्या दशहस्तकं च ॥ कोट्यर्धदिग्विंशतिलक्षलक्षद
ले मुनीष्वंगशक्रशानुहस्तं ॥ ३४ ॥

कोटिहोमे पिशस्यते ॥ स्कांदे ॥ कोटिहोमे चतुर्हस्तं चतुरस्रं समंततः ॥ योनिवप्रद्वयोपेतं तदप्याहुस्त्रिमेख
ला मिति ॥ इदं प्रायः अस्थूलद्रव्यविषयं ॥ अथ केषांचिन्मते कुंडमानमुपजातिकयाह ॥ लक्षस्यैकवृध्या
दशलक्षकाणामंतं समाप्य मर्यादीकृत्येत्यादशलक्षकांतं एकलक्षमारभ्य लक्षवृध्या दशलक्षपर्यंतमित्य
र्थः ॥ करस्यैकवृध्या दशहस्तकं मर्यादीकृत्येत्यादशहस्तकं एककरमारभ्य एककरवृध्या दशहस्तं यावत् ॥ कुंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं-दी-
२

शारदायां॥एकहस्तमितंकुंडंलक्षहोमोविधीयते॥लक्षाणादशकंयावत्तावद्धस्तेनवर्द्धयेत्॥सिद्धांतशेख
रे॥लक्षार्धेत्रिकरंकुंडंलक्षहोमेचतुःकरं॥कुंडंपंचकरंप्रोक्तंदशलक्षाकुतौक्रमात्॥षट्हस्तंलक्षविंश
त्यांकोट्यर्द्धेहस्तसप्तकं॥मितं॥इदमेवकुंडमानंकामिकादिकरादिभिर्न्नदीतैश्चलिखितं॥मतासिद्धांत
शेखरशारदादेमाङ्कुमुखेःप्राचीनैःरामवाजपेयिराघवभट्टकुंडरत्नाकरकुंडकौमुदिकरादिभिःर्न्नवी
नैश्चलिखितं॥कुत्रचिदन्यथापिकुंडमानानीत्युक्तानित्तत्तत्प्रकरणवशात्तत्तत्कर्मविशेषेद्रष्टव्यानि॥ ॥

वेदाक्षीणियुगाग्नयःशशियुगान्यष्टाब्धयस्त्रीषवोष्टांग्क्षावाङ्किरसारसांगकमितानेत्रर्षयो
क्षस्वराः॥अंगुल्योथयवाःखमष्टभिषवःखंपंचषट्सागराःसप्ताष्टमुनयस्त्वमीनिगदि
तावेदाग्निकेवाहुवः॥२५॥

अथैकहस्तादिदशहस्तांतेपावकुंडेषुभुजमानंशार्दूलविक्रीडितेनाह॥एकहस्तकुंडेचतुर्विंशत्यंगुलान्यायाम
विस्तारे॥द्विहस्तेचतुस्त्रिंशदंगुलानि॥इमानिपादोनयूकाचतुष्टयन्यूनानिअल्पांतत्वात्पूर्णान्येवधृतानि॥
त्रिहस्तेतुपंचयवाधिकैकचत्वारिंशदंगुलानि॥चतुर्हस्तेष्टचत्वारिंशत्ते॥पंचहस्तेपंचयवाधिकानित्रिपंचा
शदंगुलानि॥षष्ठहस्तेपादोनैकोनषष्टिः॥सप्तहस्तेसार्धत्रिषष्टिः॥अष्टहस्तेयवोनासप्तषष्टिः॥नवहस्तेद्वौ
सप्ततिः॥दशहस्तेयवोनाषट्सप्ततिरिति॥चतुर्भुजेकुंडेभुजा[उक्ता]इतिव्याख्या॥अत्रोपपत्तिः॥एकहस्तस्यक्षेत्र

राम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यचतुर्विंशत्यंगुलासकस्यषट्सप्तत्यधिकपंचशतानि॥५॥७६॥एतत्फलएकंहस्तक्षेत्रांगुलानिचतुर्विंशति॥२४

२४	३४	४१	४८	५३	५८	६३	६६	७२	७५	
०	०	५	०	५	६	४	७	०	७	
१	२	३	४	५	६	७	८	९	१०	

एवंक्षेत्रफलस्यद्व्यादिगुणस्यमूलंचेतुस्त्रिंशदादि अंगुलानिभवंति॥ ॥
अथयोनिनिवेशनमिंद्रवज्रयाह॥ऐंद्र्याःप्राच्याःआरभ्यकुंडत्रयीचतुरस्रयो
नियत्नादेरूपादक्षिणदिग्योनिःस्यादुत्तरस्यां॥अर्थाद्धोताउदङ्मुखः॥इत
राणिपंचकुंडानित्र्यस्रवृत्तषडस्रिपद्मास्रास्राणिप्रत्ययोनीतिप्रागग्राणि॥अर्थाद्धोताप्राङ्मुखः॥नवममपिकुंडं
दक्षिणयोनिउदगग्रं॥योनिःकोणेयोनिकुंडेच नकार्येतिव्याख्या॥स्वायंभुवे॥प्रागग्नियाम्यकुंडानांप्रो
कुंडत्रयीदक्षिणयोनिरैंद्र्याःसौम्याग्रकास्यादितराणिपंच॥पश्चाद्भगानींद्रदिगग्रकाणियोनिर्न
कोणेनचयोनिकुंडे॥३६॥छिन्नव्यासंतुर्यचिह्नंसपाशांसूत्रंशंकौपश्चिमेपूर्वगेपि॥दलाकर्षेत्को
णयोःपाशतुर्येस्यादेवंवावेदकोणंसमानं॥३७॥
णायोनिरुदङ्मुखी॥पूर्वमुखावस्थिताःशेषाःयथाशोभंव्यवस्थिताइति॥त्रैलोक्यसारे॥नवमस्यापिकुंडस्ययो
निर्दक्षिणदिक्संस्थितेति॥अन्यत्र॥नार्पयेत्कुंडकोणेषुयोनिंतांतत्रवित्तमः॥योनिकुंडेतथायोनिंपद्मेनाभिंविव
ने र्जयेदिति॥३८॥अथसर्वेषांकुंडानांप्रकृतिभूतचतुरस्रतावच्छालिन्याह॥इष्टव्यासार्द्धिगुणितव्यासंचतुर्थांशक
तचिह्नंसपाशांसूत्रंपूर्वपश्चिमसंस्थितयोःशंकौर्दक्षिणोत्तरसूत्रमध्येयथामध्याचिह्नंभवतितथाकोणयोःपाश
चतुर्थांशेकर्षेत्॥एवमन्यत्रापि॥एवंकृतेसमचतुरस्रंस्यात्॥इदमेवसर्वेषांकुंडानांमितिव्याख्या॥उक्तंच॥चतुरस्रमिदंप्रो

संति१ हला२ हल२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पव २ पृका २

कुं॰टी॰ अथ योनिकुंडमिंद्रवज्रयाह ॥ ॥चतुरस्रेक्षेत्रे चतुर्विंशतिभागीकृते सति पंचांशान्स्वीयद्वात्रिंशदंशयुक्तान्पूर्वभागे
संवर्ध्य ततः चतुर्धा विभक्तस्य क्षेत्रस्य पश्चिमचतुरस्र मध्यांकान्कर्णसूत्रस्थ चतुर्थांशेन प्रत्यक्पश्चिम भागे इंदुखं
ड वृत्तार्द्धद्वयं विलिख्य ततः पूर्वकान्दक्षिणसूत्रसंलग्नवृत्तार्द्धयावनीयमानगुणद्वयतो भगाकरं योनिकुंडं स्या
दिति व्याख्या ॥ ३८ ॥ अथ क्षेत्रफलायतनं ॥ ॥ अथ क्षेत्रत्रयपूर्वकाद्दक्षिणतोत्तरसूत्रायं यावन्नीयमानं सूत्रद्वयात्

क्षेत्रे जिनांशे पुरतः शरांशान्संवर्ध्य स्वीयरदांशयुक्तान् ॥ कर्णाभ्रमाने नलिखेंदुखंडे प्रत्यक्
पुरोंकाद्गुणतो भगाभं ॥ ३८ ॥

त्रिकोणमेकं ॥ तथा दक्षिणोत्तरसूत्राग्रात्पूर्वापरसूत्राग्रांतं यावन्नीयमानं सूत्रद्वयाद परं त्रिकोणं उभय वृत्तार्द्धमीलि
तावेकं वृत्तमिति तृतीयं ॥ क्षेत्रत्रययोगे पूर्वे फलं ॥ तत्र प्रथमस्य क्षेत्रस्य फलं अत्र लंबः अंगुलानि ॥ १७ ।पव १ पृका २
भूः २४ लंबेन निघ्नं कुमुखैक्यखंडमिति अत्र मुखाभावात् ॥ भूम्यर्धमेव लंबेन गुणितं सत् ज्ञातं प्रथमक्षेत्रफलं अं
गुलानि २०५ ।पव ।७ ॥ अथापरस्य लंबः ॥ १२ भूः २४ मेव अत्रापि तयैव रीत्या क्षेत्रफलं ॥ अथ वृत्तार्धयोरेकं
वृत्तं तत्फलं तत्र व्यासः ॥ १५ ।७ ।६ ।७ । व्यासवर्गेस्य भनवाग्निनिघ्ने सूक्ष्मफलं पंचसहस्रभक्ते इति व्यासवर्गः ॥ राम
॥ २८ ।० ।० ।२ । अयं भनवाग्निः ॥ ३९२७ । निघ्नः पंचसहस्रभक्तो ज्ञातं क्षेत्रफलं वृत्तस्य ॥ २२ ।६ ।१ ।४ ।५ । त्रयाणां १०
योगे क्षेत्रफलं पूर्णं ५७६ ।० ।४ ।५ । अत्र लीक्षापंचकं यूकाचतुष्टयं चाधिकं ॥ अल्पांतरत्वाददोषः ॥ ध्वजायाभि

द्विश्चा॥ उक्तं च॥ स्थापने सर्वकुंडानां ध्वजायः सर्वसिद्धिदः॥ शतांशो वाधिकं हीनं ह्रासवृद्धीन दूषयेत्॥ आयदोषवि
शुध्यर्थं क्रियते शास्त्रकोविदैरिति॥ एतत्क्षेत्रफलस्य उत्तरायत्वा उदीची प्राचीवत् व्यवहर्तव्या॥ एवमन्ययोर
पि॥ तस्य दार्ध्यदिश्यै॥ चतुर्विंशतिधा मध्यसूत्रं भक्त्वा पुरो न्यसेत्॥ पंचांशांश्चैकैकस्य त्रीन् विंशांशान्कोणपाद
तः॥ वर्ताहिं स्तो मध्यातिर्यक्सूत्रांतं च ततोर्पयेत्॥ पुरो बहिस्तत्सूत्रांतं द्वे सूत्रे स्यात्कुंभाकृतीति॥ इमानि कुंडा
नि शारदातिलकादि मतादिय्यथा विरुद्धानीति अनादरणीयानि न तानि वचनानि तदाकारत्वमात्रसंपादका
नि न क्षेत्रफलपूर्तिकराणि तत्रा शोष्यले शोमाभ्रादि तिस्थूलमार्गे योन्याद्याकारमात्रं प्रतिपाद्यते॥ योगणि
तानि भिन्नास्तेन चतुरस्रकुंडं लंडुलमादीना पूरयित्वा ताने वतंडुलान्योन्यकुंडादि कुंडे दत्वा तत्स्थलौ तौ स्थ्यमिति
पद्य॥ चतुरस्रस्य मध्यसूत्रं चतुर्गुणं कृत्वा॥ योन्यादिकुंडानां समं तलो वेष्टयित्वा तत्सूतौ तौ स्थ्यमिति॥ अ
त्रांगुलयवयूकालीक्षाः कृत्वा गोमुत्रिका रीत्या गुणयित्वा अष्टभिर्भागे गृहीते फले च उपर्युपरि चयोऽयमानेपल
घुपद्यते अंशास वर्णनादि कुंडमात्रे नेतियन्नो॥ ३५॥ ॥अथ वृत्तार्धवसंततिलकयाह॥ श्रीराम॥ ॥
श्रीरामजयरामजयजयराम॥ श्रीरामजयरामजयजयराम॥ छ॥ श्रीरामजयरामजयजयराम॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰टी॰
११

अथवृत्तार्ह्वसंततिलकयाह॥ स्वीयराशितांशोनयुतोयदुष्णुभागः पंचमांशाःअर्ह्लसेत्रस्यैवतेनहीनाचासोखभू
मिःक्षेत्रंतन्मितेनकर्कटेनसूत्रेणवामध्यांकालदूत्तंरत्नार्हं तस्मिन्नयतःपूर्वापरारेखांजीवारूपांहत्वार्धस्यसिध्येसा
धुस्यायथाकरोतुविद्वानितिव्याख्या॥ अत्रक्षेत्रफलं॥ अत्रक्षेत्रस्यपंचांशोंगुलाद्यः ४।६।३।१।५। एतस्यराशितां

॥ स्वराशितांशायुतेषुभागहीनस्वधरित्रीमितकर्कटेनमध्यात्॥ कृतवृत्तस्रलेऽयत॥
॥ अजीवांविदधात्विंदुदलस्यसाधुसिध्यै॥३२॥ ७॥ श्रीगोपाल॥ ॥७

रामः
११

शोंगुल्याद्यः॥०।०।२।०।४॥अनेनान्वितःपंचांशाः।४।६।६।२।१॥अनेनोनाक्षेत्रभूमिः॥१२।१।१।५।७। एतद्व्या
सार्धद्विगुणितंव्यासः॥३८॥२॥३॥३।६॥ अत्रापिव्यासस्यवर्गः॥१४।६।७।०।५।४।३।इत्यादिरीत्याक्षेत्रफ
लं॥११।५८।२।६।२। एतद्वृत्तफलंअस्यार्धहत्वार्हक्षेत्रफलं॥५७।६।१।३।१॥ अस्यांतरत्वान्नदोषः॥ अत्रापि
ध्वाजायएवेति॥३२॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं

अथ त्र्यस्रिवृत्तकुंडे शाईकविक्रीडितेनाह॥ अथ पूर्वोक्तकुंडं व्याख्यायते॥ क्षेत्रस्य तत्तृतीयांशं पूर्वतो निधाय ततउभ
यश्रोण्योः प्रत्येकं चतुर्थांशानि धाय दक्षिणतः उत्तरश्च दत्वा त्रिषु चिह्नेषु सूत्रदानात्करेष्टेदितं त्र्यस्रि जायत इति व्या
ख्या॥ अथ क्षेत्रफलानयनं॥ अत्र तृतीयांशोऽष्टांगुलानि मध्यसूत्रे योजितानि जातो लंबः॥३२॥ पश्चिमभु
जे उभयतश्चतुर्थांशाः षट् षट् अंगुलानि योजितानि जातभुः॥३६ अत्र मुखाभावात् भूमेरर्धार्धकृतं॥१८ इदं
लंबनानेन ३२ निघ्नं जातं क्षेत्रफलं॥५७६। समभुजतासद्यः क्षेत्रफलं चसितीतिक
वह्न्यंशं पुरतो विधाय च पुनः श्रोण्योश्चतुर्थांशके चिह्ने षु त्रिषु सूत्रदानत इदं स्यात्र्यस्रिकं
क्षेत्रोज्झितं॥ विश्वांशोः स्वजिनांशके न सहिते क्षेत्रेजिनांशोल्लते व्यासार्धेन मितेन मंडल इदं स्या
द्वृत्तसंज्ञं शुभं॥४०॥

त्रिभुजवैषम्यं तद्दोषाय॥ अत्रापि ध्वजाय एवेति॥ अथोत्तरार्धेन वृत्तमाह। क्षेत्रे चतुर्विंशतिविभक्ते सति त्रयो
दशांशैः स्वचतुर्विंशत्यंशयुतैर्मितेन व्यासार्धेन मंडलं यद्भवति तद्वृत्तसंज्ञं कुंडं सुदरं स्यात्॥ अथ क्षेत्रफलायत
नं॥ अत्र त्रयोदशांशानां चतुर्विंशोंशोंगुलाद्यः॥४।२।५।३। अनेन युतास्त्रयोदश॥१३।४।२।५।३। इदं व्यासा
र्धमेतद्द्विगुणं व्यासः॥२७।०।५।२।५। अत्रापि व्यासस्य वर्गेऽस्मिन्॥७३३४०१२ भंनंदाग्निनिघ्ने पंचसहस्रभक्ते त्या

ॐ कुंडकौमुदी टीका॥ पत्र॥ १३॥ शके १७६४ शा० ९।१०।१३।

कुं॰टी॰
१२

धृते॰ व्या

अथषडस्रं स्तधरयाह॥ स्रैत्रि चतुर्विंशतिधाभक्ते सति अशाद्द्द्यां शैः स्वद्वासलतितमांशयुक्ते स्तावतासार्हेनव
त्तेस्नते सतितेनैवव्यासार्हेनमितेधृतेगुणके सूत्रे सतिककेंटेवाउतरदिक्कौसतिपरावर्तनेनषट्। चिह्नानिभवंति
तेषुषट्सुचिह्नेषुषट्सूत्राणि एकांतरेणपरस्परलग्नानिदद्यात्॥ ततः सूत्रंसंधायेस्तुदोषः षट्भुजास्तेषां
नाशेदति क्रतेमंडस्तापिनाशेषडस्त्रिनेत्ररमणीयंजायत इतिव्याख्या॥ अस्मिन्षडस्रेव्यासः।३६।४।०। अत्र

भक्तेसिन्नेजिलांशैर्धृतिमितलवकैः स्वाश्विशेलांशयुक्तै व्यासार्द्धान्मिंडलेतन्मितधृतगुण
केकर्कटेवेंदुदिक्तः॥षट्चिह्नेषुप्रदद्याद्दसमितगुणकानेकमेकंचहित्वानाशेसंध्यतुदो
षामपिचवतिकृतेनैत्ररम्यंषडस्रं॥४९॥ श्रीगोपाल॥ ॥छ॥ ॥ ॥

वृत्तव्यासेसमाहृते॥ खखखवाभ्यार्क१२०००
उत्तरायंत्रिकोणमेकंमहत्॥ तद्भुजमात्रंत्रिद्ध्यंकाग्निनभश्चंद्रैः॥१०।३।२।२३। वृत्तव्यासेसमाहृते॥ खखखवाभ्यार्क१२०००
उत्तरायंत्रिकोणमेकंमहत्॥ तद्भुजमात्रंत्रिद्ध्यंकाग्निनभश्चंद्रैः॥१०।३।२।२३।
सं भक्ते लभ्यं तेक्रमशो भुजा इति त्रयाणां भुजानां मानं।३।१।४।७।०। उत्तराग्रात्पूर्वापरभुजमध्यं यावंनीयमानंसूत्रंलंब रामभ
श्चतुर्थांशोनो व्यास एव॥३।०।३।०। भुज एव भूः। मुखाभावाद्भूम्यर्धं।१५।६।३।४। लंबेन निघ्नमित्यादिना जातं क्षेत्रफलं १२
।४३२५।२। अथास्य महतस्त्रिभुजस्य त्रिष्वपि भुजेषु त्रीणि त्रीणि समान्येव लग्नानि संतितत्रैकस्य फलमानीय त्रिगुणं क
लापूर्वफके नियोजितं सत्पूर्वक्षेत्रफलं स्यात्॥ तत्र दक्षिणकोणाग्रात्पूर्वापरभुजमध्यावधिनीयमानं सूत्रं लंबः॥१।१।०।
अयं व्यासचतुर्थांशः। भुजत्र्यंशो भूमिः।१०।४।२।३। सर्वत्र्यंशा एव भुजस्यात्। अत्र मुखाभावाद्भूमेरर्धं।५।२।१।१। इह लंबे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नगुणितंक्षेत्रफलं।४८।०।३। जातंइदंत्रिगुणंत्र्यस्राणामपिफलं।१४।४।१।१। इदंपूर्वक्षेत्रफलेस्मिन्।४३।२।५।२।योजितं।
।५७।६।६।३। इदंयूकात्रयाधिकषट्यवाधिकंअत्यांतरत्वादोषः॥ अथवाव्यासोयूकांश।स्मून्नःकार्यः।ध्वजायासिद्धिस्थ॥
अथवाकिमेताक्ताव्रयासेनलघुत्रिकोणंयत्रतत्क्षेत्रस्यद्वादशांशः तत्क्षेत्रफलं।४८।०।३। तद्द्वादशगुणंपूर्णंक्षेत्रफलं
स्यात्। अथेदंकुंडंस्वबुद्धिविलासमात्ररचितमितिनोपेक्षणीयंयतः षट्कोणताभुजताक्षेत्रफलंसंपद्यतएव।मानाधिक्यो
भवेद्रोगोमानहीनेदरिद्रतेत्यादिदोषापत्तिरितिनास्ति॥ अथचेद्वक्तव्यंप्राचीनकुंडविरुद्धंतर्हिदृश्यतेचप्राचीनलक्ष्मकुं
डेषुपरस्परविरुद्धता॥ इदमेवकुंडंरामवाजपेयिभिःविषमभुजंमृदंगाकारंकृतंराघवभट्टादिभिःसमभुजमेवकारितं॥
लक्ष्मणाचार्यदियोप्येवमेवोचुः।तस्मादस्मत्कृतेनेत्ररमणीयेसमभुजेक्षेत्रफलंसंवादिनिषट्कोणेविद्वद्भिर्नानादरनण
भवितिव्यमिति॥४१॥ अथयेप्राचीनकृतावेवायद्विलास्तेषांतोषायापिसमषड्भुजंषडस्रंवसंततिलकयाह॥ अथवाचतु
जिनभक्तकुंडमानेतिथिभागेःस्वखक्ष्यभागहीनैः॥ मितकर्कटकोद्भवेवृत्तेविधुदिक्कैः समषड्भुजेःषडस्रं॥४२॥
विंशतिभक्तेकुंडमानेसतिस्वीयषष्ठ्यधिकशतभागेनहीनेपंचदशभागेमितोयःकर्कटस्तदुद्भवेवृत्तेउक्तादिक्कैःसकाशासमैः
षड्भिर्भुजैर्दत्तैः परस्परलग्नैःषडस्रंवृत्तमार्जनेनभवतीतिव्याख्या॥ अथक्षेत्रफलानयनं॥ तत्र। वृत्तव्यासेद्विसंभक्तेषडस्रे
स्फुटभुजास्फुटाइतिभुजमानं।१४।७।२। क्षेत्रमध्येदक्षिणोत्तरांरेखांदत्वाऊर्ध्वभुजसंपाततःपूर्वापरंरेखाद्वयंअधोभुज
संपातावधिदद्यात्॥ एवंकृतेचतुरस्रद्वयंपरस्परलग्नंभवति। पूर्वापररेखयोःदक्षिणोत्तररेखयासहसंपाताच्चतुर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰टी॰ ९३

शाएवप्रभवतिसैवाबाधातन्मानं॥७।३।५।भुजः१४।७।२।स्वबाधाभुजकृत्योरंतरंमूलं प्रजायते लंब इतिसाधितोलंबः१२।७।१
अयमेवमध्यलंबः लंबेननिघ्नकुं।२६।६।४।मुखे१४।७।२।क्य४४।५।६।खंडं२२।२।७।इतिजातंक्षेत्रफलं।२८०।८।१।६।
एवमपरस्यापिखंडस्यउभययोगे।५७६।३।ध्वजायासिद्धिश्च॥अथपद्मकुंडंशार्दूलविक्रीडितेनाह॥क्षेत्रस्याष्टमां
अष्टांशाच्चततश्चवृत्तशारकेतत्रादिमंकर्णिकायुग्मेषोडशकेसराणिचरमेस्वांशुभि भागेनिति॥ भक्तेषो
डशाधाशरांतरधृतेस्युःकर्कटेष्टौछदाः सर्वास्तान्वनकर्णिकाल्यजनिजायांमोच्चकांस्यात्कजं॥४३॥
शात् अष्टांशाद्ध्याचवृत्तपंचकेकृतेसतितत्रपंचकमध्येप्रथमंतत्कर्णिका॥द्वितीयेषोडशकेसराणि॥द्वितीयंकेस
रस्थानमित्यर्थः॥अंतिमेपंचमेवृत्तेखस्यअंगुलत्रयात्मकस्यएकोनविंशत्यंशेनेतिषोडशस्थानेषुदिक्षुविदिक्षुसुत
रदंतरालेचसमतयाविभाजितेतस्मिन्वृत्तेपंचचिह्नांतरेदिशिविदिशिकर्कटेधृतेसतिपरावर्तनेनअष्टपत्राणि॥स
र्वांस्तान्केसरादीन्केसरवृत्तत्तृतीयचतुर्थवृत्तानिपत्राणिचहेविद्वन्खनु।कर्णिकाल्यजामारचन॥कीदृशं॥निजस्वीय
आयामोविस्तारःतत्तुल्यऔच्चकंयस्यास्तांकजंपद्मकुंडंबहिर्वृत्तप्रमार्जनेनस्यादितिव्याख्या॥अथक्षेत्रफलानय
नं॥तत्रोपांतिमस्यचतुर्विंशत्यंगुलस्यपूर्वक्षेत्रफलं।४।५२।३।१।अंतिमवृत्तस्यास्य।११।७।५।७।क्षेत्रफलं।६११।४।
।५।०।अनयोरंतरार्धं।१२३।४।६।०।इदंपूर्वक्षेत्रफलेयोजितंवाअंतिमवृत्तंक्षेत्रफलादपवार्जेतंसंज्ञातंपूर्णफलं।५७६।०
यूकोनफलमायात्यतोनदोषः।अंतिमवृत्तेलीक्षामात्रवर्धनेनध्वजायासिद्धिश्चेति।अत्रांतिमवृत्तेपत्रांतरर्धमसंग्रहोर्थं
भूत्यागम्यबुद्धिमताप्रत्यक्षतएवोपलब्धव्यः॥४३॥

राम ९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाष्टास्त्रिकुंडमुपजातिलयाह॥ क्षेत्रे चतुर्विंशति भागे सति अष्टादशभागैः स्वीयाष्टाविंशांशेन युतैः कर्कटेन वृत्ते सति वि कृते
दिग्विदिशोर्मध्ये कृताष्टचिह्नेभ्यः अष्टभुजे स्वतृतीयमीकृतैः चिह्नद्वयं विधाय तृतीयचिह्नेन योजितेरष्टकोणं दत्ता मार्जिना
मध्यस्थाष्टदोःखंडमार्जनाच्च भवंतीति व्याख्या॥ अथ क्षेत्रफलानयनं॥ व्यासार्द्ध॥१८।५।१।०।व्यासः।३७।२।२।
अथ द्विद्विनंदेषु सागरैर्वृत्तव्यासे समाहृतो खखखवार्ककिसंभक्ते लभ्यं तेक्रमशो भुजा इति॥१४।२।२। एतद्घृतवृहद्भु
जमानं स्वदक्षिणोत्तररेखाकोटिः॥ आयते क्षेत्रे भुजकोटिघातः फलं॥ भुजकोटिज्ञानं तु वृहद्भुजतुल्यं मध्येंत
क्षेत्रे जिनांशे गजचंद्रभागैस्वाष्टा २८ भिभागेन युतैस्तु वृत्ते॥ विदिग्दिशोरंतरतोष्टसूत्रे
स्तृतीययुक्तेरिदमष्टकोणं॥४४॥ ॥श्रीगोपाल॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥
रं।१४।२। याम्योत्तररेखोभयप्रांतवर्तिरेखाखंडमानयोजितं सत्कोटिः स्यात्॥ यथा दक्षिणोत्तरपूर्वापररेखाखंडयो
गाहूर्ध्वरेखातिर्यक्करेखे भुजकोटिरूपे तदयान्नीयमानो महान्भुज एव कर्णः॥१४।२।२। यस्य वर्गार्द्धमूलं तिर्यगूर्ध्वक
पभुजं कोटिमानं लघुः।१०।७।६।२। यतः भुजकोटिवर्गयोगः कर्णवर्गो भवति॥ इदं कोटिमानं द्विघ्नं सूत्रवृद्धुजयोजि
तं जाता कोटिः। दक्षिणोत्तररेखारूपा।३४।३।५।४। एतद्बृहद्भुजघाते फलं।४९।२।१।१।२। अथ कोणक्षेत्रयोः फलं।
लघुभुजवर्गेतुल्यः॥१०।१।७।६। एतत्स्रूर्वदिस्मात्।४९।२।१।१।२। शोधितं सज्जातं फलं।३९।०।१।३।२। अस्मिन्सूर्वापि
रकोणानां चतुर्णां फलं योजितं तत्सर्णफलं स्यात्तत्र पूर्वकोणयोः फलं यथा बृहद्भुजो भुजः।१४।२।२। पूर्वापरमेरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰टी॰
२४

लारवंडे कोटिः।१०।०६।२। अनयोर्घातः।१४४।१।५।२। अस्मात्कोणक्षेत्रफलमेतत्।५०।७।७। शोधितं संजातं पूर्वकोण
योः फलं।२३।१।६। एतावदेवापरकोणयोः अनयोर्द्विघ्नमेतत्।।१०६।३।४। पूर्वक्षेत्रफलेऽस्मिन्।३९०।१।३।२। योजितं संजा
तं क्षेत्रफलं।।५७६।५।०।०। अल्पांतरत्वाददोषः।।ध्वजा सिद्धिश्च।। इदं सर्वथानत्र रमणीयमिति अंगीकर्तव्यं।। अथप्र
कारांतरेणसमाष्टभुजं।।४४।। ।।आष्टाख्यिउपजातिकयाह।। ।।मध्येसूत्रे चतुर्विंशति भक्तेस्वसमचत्वारिंशद्दंशास
हितैश्चतुर्दशाभि भागैर्व्यासार्द्धैर्मंडले कृते सतितत्रदिग्विदिशायोर्मध्ये कृताष्टसूत्रैः परस्परसंलग्नैः अष्टकोणप्र

मध्येगुणेवेदकरैर्विभक्तेशंके निजर्ष्यांघ्रिलवेनयुक्ते।।स्तोकृतेदिग्विशांतरालेगजैर्भुजैः
स्यादथवाष्टकोणं।।४५।।

... कुंडं वृत्तमार्जनाद्भवतीति व्याख्या।। अथ क्षेत्रफलानयनं।। चंद्रर्तुनंदाक
कारांतरेणप्राचीनकृतिरसिकाभिमतं कुंडं वृत्तमार्जनाद्भवतीति व्याख्या।। अथ क्षेत्रफलानयनं।। चंद्रर्तुनंदाक
तिभिर्व्यासिहृत्तुसमाहृते।।खखखाभाक संभक्ते लब्धं तेक्रमशो भुजा इति भुजानां मानं।१५०।३।४। ततोऽव्यासयोगा
तरंघातमूलं व्यासः स्वं हनोदलितः शरस्यादितिजातः शरः।।१।०।७।१।६। अथवा भुजस्योभयांतात्संमुखापरभुज रामे
प्रातद्वयं यावत्सूत्रद्वयं कुर्यादेवं कृते तिर्यक् दीर्घचतुरस्रं पार्श्वयोर्विषमभुजचतुरस्रं च स्यात्।।तत्र व्यासादस्मा १४
त्।२०।४।६।सकाशाद्विगुणं शरं विहाय शेषं दीर्घचतुरस्र भुजः।। अथवातथा व्यासवर्गांतरमूलं भुजः किंशारक
रण प्रयासेन।२६।३।०। अस्य भुज एव कोटिः।।आयते भुजकोटिघातः क्षेत्रफलं।२०।८।४।४। अथ विषमभुज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्रफलं ॥ जीवार्धशरीनव्यासार्धं विषमचतुर्भुजे लंबः ॥ ७।५।५।० उपेवपुरस्वंदीर्घचतुरस्त्रभुज एव रू: लंबेन। ७।५।५।०
निर्भंकुलै। २६।३।०। मुखे। १०।७।४।३। क्य। ३७२।४।३। खंड। १६।५।२।४। मितिक्षेत्रफलं। १४ ३।६।४। एवमपरस्यापि १४ ३।
।६।४। त्रयाणांयोग: ।५७६।१।४। ध्वजायश्च अथवा ष धनुषांफलं। आनीयसंशोध्यापि क्षेत्रफलंस्यादिति। अस्मि
न्समाष्टभुजे राघवभट्टादिभिरुक्ते शारदादिवाक्यै: सहमहान्विरोध: ॥ तस्मादुक्तमष्ट स्त्रनेत्ररम्यंक्षेत्रफलसंवादि
समभुजमेवादरणीयमिति॥ अथसमपंचास्त्रिकुंडमालिन्याह॥ तिथियुगनिगमाभ्रे १५।४।४।० वृत्तमालिख्यतस्मि
न्धृतियमदहनेलांसे: १९।२।३।१।२। सुनासीरदिक्ष: ॥ विरचिनाभिषुदोर्भिपंचकोणंसुकुंडं भवतिविगतवृत्तं चाभि
चारप्रशांत्यै॥ ४७॥ अथसप्तास्त्रिकुंडमिंद्रवज्रयाह॥ अथोत्कलिकयंचास्त्रिकुंडमाह॥ आकृत्यां २२ गुलकेविं
रच्यविलयंषड्विंशके २६ युक्कोने: कुरुतत्रचिंह्निरचनांपूर्वकलग्नेककं॥ हित्वाबाणमितान्भुजान्वकुरुष्वभानूपं
चास्त्रिकुंडभवेद्वृत्तस्यापिचमार्जनात्समभुजं कृत्यादिबाधापहं॥ ४८॥ अथोत्कलिकनयनरम्यंसप्तास्त्रिकुंडस्त्रकु
धरयाह॥ वृत्तंकुर्यात्कलांशै १६ स्तदनुमनुमितैरंगुलैरड्डियूका ७ हीनैस्तस्मिन्पुरोक्ताद्विरचयविधिनासप्ताचि
ह्नानिसम्यक्॥ प्राक्चिंह्नाच्चैकमेकंत्यजभुजरचनासंविधेयाड्रि ७ कोणं कुंडंप्रोक्तंसनोज्ञंवलयपपिदो: प्रोंछि
नान्मोदकारि॥ ४९॥ मन्माब्धिरवांगे १४।४।०।६। विरिचय्य वृत्तं मार्तंडवेदेषुरसे। १२।४।५।६। श्चतस्मिन्॥ रंध्रा
दितश्चाद्रिभुजैर्नगास्त्रंकुंडभवेद्वृत्तमिमार्जवेन॥ ४९॥ श्रीगोपाल॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं०टी०
१५

अथ खातलक्षणं कंठलक्षणं चाह ॥ ॥ कुंडखननक्षेत्रसमं कुंडस्य यावान्विस्तार आयामश्च तावत्खननमाद्यमेखला
सहिते कुंडे कार्यं ॥ योन्यादिकुंडेषु विस्तारायामयोर्नानात्वाच्चतुरस्रे वायामविस्तारो याह्यो ॥ अन्ये तु मेखलां वर्ज
यित्वा भूमावेव तावत्खननं कार्यमित्याहुः ॥ कंठोपि क्षेत्रचतुर्विंशत्यंशमानः खातान्बहिः समंतादेकांगुलमितः ॥
अन्ये क्षेत्रस्य द्वादशांशपरिमित इति प्राहुरिति व्याख्या ॥ सिद्धांतशेखरे ॥ खातं कुंडप्रमाणं स्यादूर्ध्वमेख
लया सहेति ॥ प्रतिष्ठासारसंग्रहे ॥ यत्र त्रिमेखलो छायं ज्ञात्वा शेषमधः खनेति ॥ सोमशंभौ ॥ हस्तमात्रं
खातं क्षेत्रसमं प्राहुरन्ये तु मेखलां विना ॥ कंठो जिनांशमानः स्यादेकांगुल इति चापरे ॥ ४६ ॥
खनेत्तिर्यगूर्ध्वमेखलया सहेति ॥ अथ पक्षांतरं शारदातिलके ॥ यावान्कुंडस्य विस्तारः खननं तावदीरितं ॥ प्रयो
गसारे ॥ चतुरस्रं चतुःकोणसूत्रैः कृत्वा यथा पुरा ॥ हस्तमात्रेण तन्मध्ये तानिम्नायतरं खनेत् ॥ गणेशविमर्शि
न्यां ॥ चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति ॥ इति पक्षद्वैधे ॥ वयं तु ॥ स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् श्रीराम
पृथगिति वचनात् ॥ होमाल्पत्वबहुत्वे पूर्वोत्तरपक्षावाश्रयणीयाविति युक्तं ॥ यतः अथ परिमाणमिति कात्या
यनोक्तिः ॥ कालोत्तरे ॥ खाता द्व्यंगुले खंडः सर्वकुंडेष्वयं विधिः ॥ चतुर्विंशतिमो भागः कुंडानामंगुलं स्मृतमिति ॥ १५
एतत्पारिभाषिकमंगुलं सर्वत्र बोद्धव्यं ॥ सोमशंभौ ॥ बहिरेकांगुलः कंठो द्व्यंगुलः केचिदागमेष्विति ॥ तेनाद्यः पक्ष ए
व श्रेयान् ॥ बहुसंमतत्वात् ॥ अथ मेखलानामधमतादिपक्षमाह ॥ ॥ अथमामेखलैकास्यान्मध्यमं मेखला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ड्यं॥ श्रेष्ठातिस्रोथवाद्धित्रीपंचस्वधममादिकं॥ एकमेखलः पक्षोऽधमः द्विमेखलः पक्षः मध्यमः त्रिमेखलश्श्रेष्ठः॥ अ
यपक्षातरंद्विमेखलःपंचमेखलःश्रेयान्॥ एकमेखलोधमाधमइतिव्याख्या॥ क्रियासारे॥ नाभियोनिसमाख्युकं कुं
डंश्रेष्ठंत्रिमेखलं॥ कुंडं द्विमेखलंमध्यंनीचस्यादेकमेखलमिति॥ लक्षणसंग्रहे॥ मुख्यास्तुपंचधाःप्रोक्ताःमध्यमास्ति
स्र एवच॥ द्विस्यातामधमेपक्षे एकासात्वधमाधमेति॥ सोमशंभुनातुविशेषउक्तः त्रिमेखलं द्विजे कुंडं क्षत्रियस्य
द्विमेखलं॥ मेखलैकातुवैश्यस्यैतु॥ ४६॥ ॥अथखातखमेखलाः क्षेत्रसमामितिस्पष्टं वदन्मेखलालक्षणं रथोद्ध
तयाह॥ ॥अष्टधाभक्तक्षेत्रस्ययस्त्र्यंगुलात्मकोभागस्ताहशैःपंचभिर्भागैर्भुवंखनेत्॥ उपरित्रिभिःताहशैर्भागै
अष्टधाविहितकुंडशरांशैः संखनेद्भुवमुपर्यनलांशैः॥ मेखलाविरचयेदपितिस्रः
षड्गजार्कलविविस्तृतिपिंडाः॥ ॥४७॥ ॥छ॥ ॥छ॥ ॥छ॥
स्तिस्रोमेखलारचयेत्॥ कीदृशीः षडष्टद्वादशांशाश्चतुस्त्रिद्व्यंगुलमितास्तेतुत्र्यांविस्तारेचं यासांताइतिव्याख्या॥
विश्वकर्मा॥ व्यासात्खातकरः प्रोक्तोनिम्नंतिष्यंगुलेनतु॥ उन्नतासावनुांगुलैरितिक्रियासे॥ प्रधानमेखलोत्सेध
मुक्तमत्रनवांगुलं॥ तद्बाह्यमेखलोत्सेधंपंचांगुलविधिस्मृतं॥ तद्बाह्यमेखलोत्सेधमंगुलद्वितयंक्रमात्॥ चतु
स्त्रिद्व्यंगुलोव्यासोमेखलात्रितयस्यतु॥ योगिनीहृदयेपिमेखलाश्शृणुमेदेवीहस्तादिषुविशेषतः॥ षट्नागार्की
शांसंभायोर्मितास्युर्गोपिताः शुभाइति॥ ४७॥ ॥अथप्रकारांतरेणमेखलालक्षणंनाभिलक्षणंचविपरीतानिकाभ्यां
शालिन्याह॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुण्डी०
१६

अथ प्रकारांतरेण मेखलालक्षणं नाभिलक्षणं च विपरीतानि काभ्यां शालिन्याह ॥ ॥ रसांशाका द्युन्नता विस्तृताश्च तिस्रोऽथ वैका युगभागतुल्या ॥ पंचाथवा षड्द्वार वेदराम द्व्यंशोस्तता स्युर्नवभागपिंडः ॥ ४८ ॥ आद्याः परास्त करभाग दीनाजिनांशा कंठाद्बहिरेव सर्वाः ॥ कुंडानुकारा अपि मेखलास्यु रर्कांगभागो यतत स्तु नाभिः ॥ ४९ ॥ कुंडाग्रे नाभिरंसोजसाम्यो शार्द्धयन्मेनांशहानिर्दलाग्रे ॥ शेषक्षेत्रे वह्नि २ वृत्ते समेते स्युर्वै कर्णीकेसराः पत्रकाणि ॥ ५० ॥ ॥ अथ वा क्षेत्र षड्शांशा द्युन्नताः षडंशोनेव विस्तृतास्तिस्रो मेखला भवंति ॥ अथैक मेखला पक्षमाह ॥ अथ वैकैव मेखला क्षेत्र चतुर्थांशोनोच्चा विस्तृता वस्यात् ॥ अथ पंचमेखला पक्षमाह ॥ अथवा पंचमेखलाः कार्याः षट्पंचचतुस्त्रिद्व्यंगुले पारिभाषिके विस्तृताः ॥ अथ पंचमेखलानामुच्चतामाह ॥ तत्रादिमा नवभागः पिंडः औच्च्यं यस्याः सा परिभाषिक नवांगुलोच्चास्यात् ॥ अपरा मेखला तस्या आद्याया पः शरांशः पंचमांशास्तेन हीना भवति यथा एकहस्ते कुंडे प्रथम मेखला नवांगुलोच्चा अस्याः पंचमांशः । १।६।३।९।५। एष एक द्वि त्रि चतुर्गुणः अधम मेखलामानेन्यूनः कृतः सन्नूतदधस्थानां मेखलानां औच्च्यं स्यात् । यथेदं द्वितीय मेखलोच्च ७।२।४।६।३ एवमपरासामिति द्रष्टव्यं ॥ ताः मेखलाः सर्वाक्षेत्र चतुर्विंशतिभाग भित्तात् कंठात् बहिरेव भवंति ॥ कीदृशीः कुंडानुकारा योन्यादि कुंडेषु योन्याद्याकारास्युः अपि एवार्थः ॥ अथ नाभिलक्षणमाह ॥ नाभिर्द्वादशांशोनोच्चः षडंशोन विस्तृतः कुंडानुकारः या दृशं चतुरस्राद्याकारवत् । कुंडं तादृशो नाभिश्चतुरस्राद्याकारवानित्यर्थः ॥ अथवा नाभिः अंभोजसमः कमलाकारः कार्यः ॥ अथवा नाभिः अब्जे पद्मकुंडे न भवति तत्र नाभिरूपायाः

का

राम
१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णिकायाः सत्वात्॥ अथ पद्मकारकरणं नाभिरूच्यते॥ दलाग्रे दलाग्रनिमित्तं घ्यंगुलोच्चं चतुरंगुलविस्तारायां मे
नाभौ ईनां शतानि द्वादिशांशात्यागः कार्यः॥ शेषं उर्वरितं यत्क्षेत्रं तस्मिन् तत्रयं सम भागेन कार्यं॥ ततत्र मध्याच्चि
क्रात्॥ प्रथमं वृत्तं कर्णिका द्वितीयं वृत्तं केसरस्थानं तृतीये पत्राणि कार्याणि तद्बहिर्वशिष्टद्वादशांशेन दला
ग्राणि रचयेदिति व्याख्या॥ वासिष्ठं॥ प्रथमं मेखला तत्र द्वादशांगुलविस्तृतिः॥ चतुर्भिरंगुलैस्तस्या श्चो
न्नतिश्च समंततः॥ तस्या श्चोपरि वप्रस्या चतुरंगुलमुन्नतः॥ अष्टाभिरंगुलैः सम्यकू विस्तीर्णस्तु समंततः॥
तस्योपरि पुनः कार्यो विप्रः सोपि तृतीयकः॥ चतुरंगुलविस्तीर्णश्चोन्नतश्च यथाविध इति॥ तथापिंगलम
ते॥ एका षडंगुलोत्सेधे विस्तारा मेखलाऽमतेति॥ अथ लक्षणसंग्रहे विशेषः॥ चतुरंगुलविस्तारोत्सेधा वै
कमेखलेति॥ अत्रांतरे षष्ठांशेनाष्टमांशेन मेखलाद्धिं तयं विदुरिति अयं पक्षः। अंबुसंमतत्वादुपेक्षित
एव॥ सिद्धांतशेखरे॥ षट्‌बाणाब्धिवह्नि नेत्रमितास्युःपंचमेखलाइति। लक्षणसंग्रहे॥ पंचवा मेखलाः
कार्याः षट्‌पंचाधित्रिपक्षकेः॥ अथ मा कुंड सहितांतरोत्सेधे नवांगुलेति॥ पिंगलमते। खाता देकांगुलं त्य
का मेखलानां स्थितिर्भवेदिति॥ शारदायां॥ कुंडानां या दृशं रूपं मेखलानां च तादृशमिति॥ तत्रैव। कुंडानां
नां कल्पयेदंत र्नाभिमंबुजसंनिभं॥ तत्तत्कुंडानुरूपं वा मानमस्याभिगद्यते॥ मुष्ट्यरत्न्येकरस्तानां नाभेरु
त्सेधतारतः॥ नेत्रवेदांगुलोपेतो कुंडे धन्येषु वर्धयेत्॥ पद्मेनाभिं विवर्जयेदिति प्रागेव लिखितं॥ अंबुजाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं·टी·
९७

क

रकर्णंतत्रैव:॥ पद्मक्षीत्रस्य संत्यज्य द्वादशांशांबहि: सुधी:॥ नन्मध्यं विभजेद्वृत्तैस्त्रिभि: समविभागत:॥ आद्यंस्यात्कर्णिका
स्थानं केसराणां द्वितीयकं॥ तृतीयं तत्र पत्राणां मुक्तं दलाग्रमिति॥ अथयोनिलक्षणंस्कधरयाह॥ योनिर्व्यासार्ध
दीर्घाविततिगुणस्वशलापताद्धिद्विभागोत्तुंगाता वत्संमंतात्परिधिरूपरिगाता वदग्रेणरम्यं॥ निम्नंकुंडंविंशांतीवलय
दलयुगेनान्विताधाविशाला मूलात्सच्छिद्रनालांतरवटरुचिरा अश्वत्थ पत्राकृति:स्यात्॥ ५२॥ योनिर्व्यासार्धेनदीर्घा
विस्तारात्तृतीयांशेन विस्तीर्णा चतुर्विंशांशेनाढ्या॥ चतुर्विंशांशेनपरिधि: मेखला यस्या सा तावतेवाग्रेण चतुर्वि
शांशेननिम्नं यथास्यात्तथा कुंडं प्रतिशांतीवलयदलयुगेनवृत्तार्धद्वयेनयुता आओविशाला अर्थात्॥ उपरिस्थवलय
संकोचवती मूलादुन्मूलात्सकाशात्मध्ये सच्छिद्रनालं यस्या: सा॥ पद्मनालकारता न्नाशोक्ति: अंतर्मध्ये वटोगर्त:
स्रुचिघृतधारणार्थं यद्वटेन रुचिरा सुंदरा सा॥ अश्वत्थपत्राकृति:स्यात्॥ वायवीये मेखलामध्यत:॥ कुर्यात्सच्छि
मेदक्षिणेपिवा॥ शोभनन्मध्यत: किंचिन्निम्नामुन्मीलिताशनैरिति॥ योनिमिति॥ त्रैलोक्यसारे॥ दीर्घास्तूर्ध्वांगु
लायोनि: पावकांशोनविस्तृता॥ एकांगुलोच्छ्रितासंतु प्रविष्टाभ्यंतरेतथा॥ चंद्रार्धद्वयसंयुक्ताचाश्वत्थदलव
न्मता॥ अंगुष्ठमेखलायुक्तामध्येताज्याधृतिस्तथेति॥ पंचरात्रे॥ अर्कांगुलोच्छ्रितां योनिं विदध्यात्तावदायतां नि
ति॥ तवदीर्घंअर्कांगुलोच्छ्रितामित्यस्य विवरणं॥ नवांगुला मेखला अंगुलद्वयंउच्छ्राय: कुत्रचिदुक्त:॥ अंगुलं परि
धिरिति द्वादशांगुलोच्छ्राय:॥ अयंपक्षो बहुसंमत: पक्षोन॥ अतोस्मादुक्त: एकादशांगुलोच्छ्राय: पक्षोबाहुसं

राम
९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=15.07.20 15:39
,TRANSFERRED=2020/07/15 at 15:43:46
,PAGES=35
,TYPE=STD
,NAME=S0003336
,Book Name=M-2508-KUND SIDHANT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection